# શ્રીધૂમાવતીસ્તોત્રમ્

Shri Dhumavati Stotram

sanskritdocuments.org

June 6, 2018

# Shri Dhumavati Stotram

# શ્રીધૂમાવતીસ્તોત્રમ્

## Sanskrit Document Information

Text title : dhUmAvatIstotram

File name : dhUmAvatIstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : Lalitha Parameswari parameswari.lalitha at gmail.com, NA

Description-comments : In shAktapramoda and mantramahArNava

Latest update : June 6, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 6, 2018

*sanskritdocuments.org*

Shri Dhumavati Stotram

# શ્રીધૂમાવતીસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

ધૂમાયાઃ સ્તોત્રમ્ ।

પ્રાતર્યાસ્યાત્ કુમારી કુસુમકલિકયા જાપમાલાં જપન્તી
મધ્યાહ્ને પ્રૌઢરૂપા વિકસિતવદના ચારુનેત્રા નિશાયામ્ ।
સન્ધ્યાયાં વૃદ્ધરૂપા ગલિતકુચયુગા મુણ્ડમાલાં વહન્તી
સા દેવી દેવદેવી ત્રિભુવનજનની કાલિકાપાતુ યુષ્માન્ ॥ ૧॥

બદ્ધ્વા ખટ્વાઙ્ગકોટૌ કપિલવરજટા મણ્ડલમ્પદ્મયોનેઃ
કૃત્વાદૈત્યોત્તમાઙ્ગૈઃ સ્રજમુરસિશિરશ્શેખરં તાર્ક્ષ્યપક્ષૈઃ ।
પૂર્ણંરક્તૈઃ સુરાણાં યમમહિષમહાશૃઙ્ગમાદાયપાણૌ
પાયાદ્વોવન્દ્યમાનઃ પ્રલયમુદિતયા ભૈરવઃ કાલરાત્ર્યામ્ ॥ ૨॥

ચર્વન્તીમસ્થિખણ્ડં પ્રકટ કટકટા શબ્દસઙ્ઘાતમુગ્રં
કુર્વાણિ પ્રેતમધ્યે કહહકહકહા હાસ્યમુગ્રં કૃશાઙ્ગી ।
નિત્યં ન્નિત્યપ્રસક્તાં ડમરુડિમડિમાં સ્ફારયન્તીં મુખાબ્જં
પાયાન્નશ્ચણ્ડિકેયં ઝઝમઝમઝમા જલ્પમાના ભ્રમન્તી ॥ ૩॥

ટણ્ટણ્ટણ્ટણ્ટટણ્ટા પ્રકટ ટમટમા નાટઘણ્ટાં વહન્તી
સ્ફેં સ્ફેં સ્ફેં સ્ફારકારા ટકટકિતહસા નાદસઙ્ઘટ્ટ ભીમા ।
લોલમ્મુણ્ડાગ્રમાલા લલહલહલહા લોલલોલાગ્રવાચં
ચર્વન્તીચણ્ડમુણ્ડં મટમટમટિતે ચર્વયન્તી પુનાતુ ॥ ૪॥

વામે કર્ણે મૃગાઙ્કં પલયપરિગતં દક્ષિણે સૂર્યબિમ્બં
કણ્ઠે નક્ષત્રહારં વરવિકટજટાજૂટકે મુણ્ડમાલામ્ ।
સ્કન્ધેકૃત્વોરગેન્દ્રધ્વજનિકરયુતં બ્રહ્મકઙ્કાલભારં
સંહારે ધારયન્તી મમહરતુભયં ભદ્રદા ભદ્રકાલી ॥ ૫॥

તૈલાભ્યક્તૈકવેણી ત્રપુમયવિલસત્ । કર્ણિકાક્રાન્તકર્ણા
લૌહેનૈકેન કૃત્વાચરણનલિનકામાત્મનઃ પાદશોભામ્ ।

દિગ્વાસા રાસભેન ગ્રસતિજગદિદં માયયા કર્ણપૂરા
વર્ષિણ્યાતિપ્રબદ્ધા ધ્વજવિતતભુજા સાસિદેવિત્વમેવ ॥ ૬॥

સઙ્ગ્રામે હેતિકૃત્વૈસ્સરુધિરદશનૈર્યદ્ભટાનાં
શિરોભિર્માલામાબદ્ધ્યમૂર્ધ્નિ ધ્વજવિતતભુજા ત્વં શ્મશાને પ્રવિષ્ટા ।
દૃષ્ટા ભૂતપ્રભૂતૈઃ પૃથુતરજઘના બદ્ધનાગેન્દ્ર કાઞ્ચી
શૂલગ્રવ્યગ્રહસ્તા મધુરુધિરસદા તામ્રનેત્રા નિશાયામ્ ॥ ૭॥

દંષ્ટ્રા રૌદ્રેમુખેઽસ્મિંસ્તવવિશતિજગદ્દેવિ સર્વં ક્ષણાર્ધાત્
સંસારસ્યાન્તકાલે નરરુધિરવશાસમ્પ્લવેભૂમધૂમ્રે ।
કાલીકાપાલિકી સા શવશયનતરા યોગિની યોગમુદ્રા
રક્તારુદ્ધિઃ સભાસ્થા મરણભયહરા ત્વં શિવા ચણ્ડઘણ્ટા ॥ ૮॥

ધૂમાવત્યષ્ટકં પુણ્યં સર્વાપદ્વિનિવારકમ્ ।
યઃ પઠેત્ સાધકો ભક્ત્યા સિદ્ધિં વિન્દતિ વાઞ્છિતામ્ ॥ ૯॥

મહાપદિ મહાઘોરે મહારોગે મહારણે ।
શત્રૂચ્ચાટે મારણાદૌ જન્તૂનાં મોહને તથા ॥ ૧૦॥

પઠેત્ સ્તોત્રમિદં દેવિ સર્વત્ર સિદ્ધિભાગ્ભવેત્ ।
દેવદાનવગન્ધર્વા યક્ષરાક્ષસપન્નગાઃ ॥ ૧૧॥

સિંહ વ્યાઘ્રાદિકાસ્સર્વે સ્તોત્ર સ્મરણમાત્રતઃ ।
દૂરાદ્દૂરતરં યાન્તિ કિં પુનર્માનુષાદયઃ ॥ ૧૨॥

સ્તોત્રેણાનેન દેવેશિ કિં ન સિદ્ધ્યતિ ભૂતલે ।
સર્વશાન્તિર્ભવેદ્દેવિહ્યન્તે નિર્વાણતાં વ્રજેત્ ॥ ૧૩॥

ઇત્યૂર્ધ્વામ્નાયે ધૂમાવતી સ્તોત્રં સમાપ્તમ્ ॥

Proofread by Lalitha Parameswari parameswari.lalitha at gmail.com

*Shri Dhumavati Stotram*

pdf was typeset on June 6, 2018

Please send corrections to *sanskrit@cheerful.com*